।। श्रीसत्यदत्तव्रतपूजा।।

श्रीगणेशाय नमः।। श्रीदत्त।। व्रती प्रातस्तिलामलकल्केन स्नात्वा व्रतं संकल्प्य कृतोपोषणः सायं पुनः स्नात्वा वाससी परिधाय गोमयोपलिप्ते रंगवल्ल्यादि रञ्जिते प्रदेशे कल्पितं शुभं पूजास्थानमागत्य संभृतपूजासंभारः आसन उपवेश्य आचम्य प्राणानायम्य कुलदेवगुर्वादिवन्दनः सुमुखश्चेत्यादि देशकालौ संकीर्त्य मम आत्मनः...र्थं मम समस्तसंभावितदुरितोपशमपूर्वसकलमनोरथसिद्ध्यर्थं यथामीलितोपचारद्रव्यैः (पुरुषसूक्तादिमंत्रैः) श्रीसत्यदत्तस्य सांगस्य सपरिवारस्य पूजनं करिष्ये।। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं कलशाद्याराधनं शरीरशुद्ध्यर्थं षडङ्गन्यासांश्च करिष्ये।। इति संकल्प्य गणपतिपूजनादि कृत्वा अपवित्रः प०।। ततः ॐ मही द्यौरिति भूमिं स्पृष्ट्वा- ओषधय इति धान्यपुंजं कृत्वा- आकलशेष्विति कलशं संस्थाप्य तत्र इमं मे गंगे इति जलं- कांडात्कांडादिति दूर्वाः- अश्वत्थेव इति पंचपल्लवान्- याः फलिनीरिति फलं- स हि रत्नानि- हिरण्यरूप इति हिरण्यं च प्रक्षिप्य- युवासुवासा इत्यनेन वस्त्रेणाविष्ट्य पूर्णादर्वीति पूर्णपात्रं निधाय तत्र वरुणं संस्थाप्य पंचोपचारैः पूजयेत्। (ततः आदित्यादिनवग्रहान् लोकपालान्वा आवाह्य पूजयेत्।) ततः पीठप्राग्द्वारे - ॐ लक्ष्मीनारायणाभ्यां०। दक्षिणे ॐ पार्वतीपरमेश्वराभ्यां०। पश्चिमे ॐ रतिकंदर्पाभ्यां०। उत्तरे द्वारे ॐ भूवराहाभ्यां०। मध्ये ॐ नमो भगवते दत्तात्रेयाय इति श्रीसत्यदत्तं यंत्रे मूर्तौ गुरुपादुकासु शालिग्रामादिषु वा आवाहयेत्। अथ ध्यानम्। श्रीदत्तं खेचरीमुद्रामुद्रितं योगिसद्गुरुम्। सिद्धासनस्थं ध्यायेऽभीवरप्रदकरं हरिम्।। इति ध्यानम्। ॐ सहस्रशीर्षा०।। दत्तात्रेयाह्वयाम्यत्र परिवारैः सहार्चने। श्रद्धाभक्त्येश्वरागच्छ ध्यातधाम्नांजसा विभो।।१।। इत्यावाहनम्।। ॐ पुरुषएवे०।। सौवर्णं रत्नजडितं कल्पितं देवतामयम्। रम्यं सिंहासनं दत्त तत्रोपविश यंत्रिते।।२।। इत्यासनम्। ॐ एतावान०।। पाद्यं चंदनकर्पूरसुरभि स्वादु वारि ते। गृहाण कल्पितं तेन दत्तांघ्री क्षालयामि ते।।३।। इति पाद्यम्। ॐ त्रिपादू०।। गंधाब्जतुलसीबिल्वशमीपत्राक्षतान्वितम्। सांब्वर्घ्यं स्वर्णपात्रेण कल्पितं दत्त गृह्यताम्।।४।। इत्यर्घ्यम्।। ॐ तस्माद्विरा०।। सुस्वाद्वाचमनीयाम्बु हैमपात्रेण कल्पितम्। तुभ्यमाचम्यतां दत्त मधुपर्कं गृहाण च।। इत्याचमनीयम्। ॐ यत्पुरुषेण०।। प्रवचनादिसुदुर्लभताश्रुतेस्त्र्यधिपते त इह श्रुतिविश्रुते। परमभक्तिसुशीतलसज्जलं वपुषि सिक्तमथाप्लुतयेऽस्त्वलम्।। इति स्नानम्। ॐ आप्यास्व०।। कामधेनु०।।१।। इति पयःस्नानम्। ॐ दधिक्राव्णो०।। चंद्रमंडल०।।२।। इति दधिस्नानम्। ॐ घृतंमिमि०।। आज्यं सुराणा०।।३।। इति घृतस्नानम्।। ॐ मधुवाता०ऋक् ३ ।। सर्वौषधि०।।४।। इति मधुस्नानम्। ॐ स्वादुःपव०।। इक्षुदंड०।।५।। इति शर्करास्नानम्। ॐ गंधद्वारां०।। मंदाकिन्यास्तु०।।६।। इति गंधोदकस्नानम्। ॐ आपोहिष्ठा० ३।। इति शुद्धोदकस्नानम्।। ततो देवं गंधाद्युपचारैः संपूज्य- उत्तरे निर्माल्यं विसृज्य पुरुषसूक्तरुद्रपवमानश्रीसूक्तादिभिरभिषेकं कुर्यात्।। (ॐ कनिक्रद० इति अभ्यंगः।) देवं पीठे संस्थाप्य ॐ तं यज्ञं०।। भक्त्या दिगंबराचान्त जलेदं दत्त कल्पितम्। काषायपरिधानं तद्गृहाणणैणेयचर्म च।। इति वस्त्रम्। ॐ तस्माद्य० संभूतं०।। नानासूत्रधरैते ते ब्रह्मसूत्रे

प्रकल्पिते।। गृहाण दैवतमये श्रीदत्त नवतंतुके।।८।। इति यज्ञोपवीतम्।। ॐ तस्माद्य०ऋचः०।। भूतिमृत्स्नासुकस्तूरीकेशरान्वितचंदनम्। रत्नाक्षताः कल्पितास्त्वामलङ्कुर्वेऽथ दत्त तैः।।९।। इति चंदनं अक्षतांश्च। ॐ अहिरिव०।। हरिद्रा रंजि०।। इति हरिद्रां।। कुंकुमं कामदं० इति कुंकुमं नानापरिमलद्रव्याणि च समर्प्य। तस्मादश्वा०।। सच्छमीबिल्वतुलसीपत्रैः सौगंधिकैः सुमैः।। मनसा कल्पितैर्नानाविधैर्दत्तार्चयाम्यहम्।।१०।। इति पुष्पाणि।। (ततः सति संभवे अष्टोत्तरशतनामभिः पुष्पतुलसीपत्रबिल्वपत्रादिभिः पूजयेत्।) अथावरणपूजनम्।। अद्येत्यादि० श्रीसत्यदत्तव्रतांगत्वेनावरणपूजं करिष्ये इति संकल्प्य गंधाक्षतपुष्पैः देवताः पूजयेत्। ॐ शिक्षायै नमः ॐ कल्पाय नमः ॐ व्याकरणाय नमः। ॐनिरुक्ताय नमः। ॐ ज्योतिषाय नमः। ॐ छंदसे नमः। ॐ वह्नये नमः। ॐ ईशाय नमः। ॐ रक्षसे नमः। ॐ वायवे नमः।।१।। दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।। इत साक्षतं जलमुत्सृजेत्। एवं सर्वत्र।। ॐ ऋग्वेदाय नमः। ॐ यजुर्वेदाय नमः। ॐ सामवेदाय नमः। ॐ अथर्वणाय नमः। ॐ इतिहासपुराणेभ्यो नमः। ॐ मीमांसायै नमः। ॐ न्यायाय नमः।।२।। दयाब्धे त्राहि० द्वितीयावरणार्चनम् २।। ॐ सरस्वत्यै नमः। ॐ गणपतये नमः। ॐ शुकाय नमः। ॐ सुमंतवे नमः। ॐ जैमिनये नमः। ॐ वैशंपायनाय नमः। ॐ पैलाय नमः। ॐ गोभिलाय नमः।।३।। दयाब्धे त्राहि० तृतीयावरणार्चनम्।।३।। ॐ कश्यपाय नमः। ॐ अत्रये नमः। ॐ भरद्वाजाय नमः। ॐ विश्वामित्राय नमः। ॐ गौतमाय नमः। ॐ जमदग्नये नमः। ॐ वसिष्ठाय नमः। ॐ व्यासाय नमः।।४।। दयाब्धे त्राहि० चतुर्थावरणार्चनम्।।४।। ॐ अणिमायै नमः। ॐ महिमायै नमः। ॐ गरिमायै नमः। ॐ लघिमायै नमः। ॐ प्राप्त्यै नमः। ॐ प्राकम्यायै नमः। ॐ इशित्वायै नमः। ॐ वशित्वायै नमः।।५।। दयाब्धे त्राहि० पंचमावरणार्चनम्।।५।। ॐ नंदनाथाय नमः। ॐ मत्स्येंद्राय नमः। ॐ दलेंद्राय नमः। ॐ गोरक्षाय नमः। ॐ गोगणेश्वराय नमः। ॐ नागार्जुनाय नमः। ॐ मेघनादाय नमः। ॐ भुजंगाय नमः। ॐ कुरुनायकाय नमः। ॐ भैरवाय नमः।।६।। दयाब्धे त्राहि० षष्ठावरणार्चनम्।।६।। ॐ इंद्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ सोमाय नमः। ॐ ईशानाय नमः।।७।। दयाब्धे त्राहि० सप्तमावरणार्चनम्।।७।। अनेन आवरणदेवतापूजनेन श्रीसत्यदत्तः प्रीयताम्।। ॐ यत्पुरुषं व्यद०।। लाक्षासिताभ्रश्रीवासश्रीखंडागरुगुग्गुलैः। युक्तोऽग्नियोजितो धूपो हृदा स्वीकुरु दत्त तम्।।११।। इति धूपम्।। ॐ ब्राह्मणोऽस्य०।। स्वर्णपात्रे गोघृताक्तवर्त्तिप्रज्वालितं हृदा। दीपं दत्त सकर्पूरं गृहाण स्वप्रकाशक।।१२।। इति दीपम्। ॐ चंद्रमा०।। सषड्रसं षड्विधान्नं नैवेद्यं गव्यसंयुतम्। कल्पितं हैमपात्रे ते भुंक्ष्व दत्तांब्वदः पिब।।१३।। इति नैवेद्यम्। त्रीश तेऽद्य परभक्तिवीटिका पंचमैकपुरुषार्थसाधिका। निर्विकल्पसमाधितः पुरा रञ्जिकाऽस्तु भवभञ्जिका वरा।। इति ताम्बूलम्।। हिरण्यगर्भेति दक्षिणा। इदं फलमिति फलानि। ॐ श्रिये जातः श्रिय० कर्पूरपूरेण मनोहरेण०।। इति नीराजनम्।। ॐ नाभ्या०।। त्वं त्रीशमहं त्वमित्यवगते स्थेम्ने निदिध्यासनात्मानस्ते परिदक्षिणा हि विहिता यद्यच्च मे क्रीडितम्।। तद्ब्रह्मास्तु चिदन्वयेक्षितुरथो त्वामनुस्मरन्

व्याहरेतारंतारकमेकमात्मनि यथा शार्दूलविक्रीडितम्।।१४।। इति प्रदक्षिणाः।। ॐ सप्तास्या०।। नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादुकेभ्यः।। आचार्यसिद्धेश्वरपादुकाभ्यो नमोऽस्तु लक्ष्मीपरिपादुकाभ्यः ।।१५।। इति नमस्कारान्।। ॐ यज्ञेन यज्ञ०।। राजाधिरा०।। ॐ दिगंबराय विद्महे अवधूताय धीमहि। तन्नो दत्तः प्रचोदयात्।। मंत्रवन्निहितो मूर्ध्नि दत्त ते कुसुमाञ्जलिः।। कलप्यन्त मनसा गीतवाद्यनृत्योपचारकाः।। १६।। इति मंत्रपुष्पाञ्जलिं राजोपचारांश्च।। अथ प्रार्थना।। त्वत्प्रेमभक्त्यैव सदा मदात्मा धिया धियं दृष्टिमपीश दृष्ट्या। अङ्गैः सदाङ्गानि दृढं दयाब्धे हरे निबध्नास्त्विति मेऽस्ति याच्ञा।।१।। यः सर्वहृत्स्थोऽस्य यतः स्मृतिर्विद्वेदान्तकृद्योऽपि च वेदवेद्यः।। समौ यदंशौ सयुजौ सुपर्णौ वृक्षाश्रितौ भुक्त्यवलोकनोत्कौ।।२।। स त्वं परात्मा पुरुषोत्तमः श्रुतिख्यातः समाविश्य जगत्त्रयं सदा।। ईशाव्ययानन्त बिभर्षि दत्त ते पादाब्जयुह्माय नमोऽस्तु सर्वदा।।३।। असकृदभिहिता तेऽनेकजन्मप्राप्तपुण्यैः प्रणतिविततिरेषा द्वैतशेषाऽविशेषा।। त्वयि विनिहितमेतन्मेऽद्य सर्वं स्वकीयं त्र्यधिप जयतु पूजा त्वद्यशोमालिनीयम्।।४।। मंत्रहीनं०।।५।। अन्यथाशर०।।६।। यस्य स्मृत्या०।। इति प्रार्थना।। अनेन यथा० श्रीसत्यदत्तः सांगः सपरिवारः प्रीयताम्।। इति पूजाविधिः।।

।। श्रीसत्यदत्तव्रतकथा।।

।। श्रीगणेशाय नमः।। श्रीदत्त।। दीपक उवाच।। दत्तात्रेयाभिदः कोऽयं देवः सिद्धेशवन्दितः। वर्णयन्ति महात्माने यच्चरित्रमुत्तमम्।।१।।वेदधर्मा उवाच।। धन्योऽसि कृतकृत्योऽसि सौभाग्योऽसि धरातले। श्रीदत्तात्रेयमाहात्म्ये यस्य ते मतिरुत्तमा।।२।। योगीशस्य परं वक्ष्ये माहात्म्यं पापनाशनम्। सद्यः सिद्धिप्रदं नृणां सत्यदत्तव्रताश्रयम्।।३।। कलिमागतमाज्ञाय शौनकाद्या महर्षयः। सत्रं स्वर्गाय लोकाय सहस्रसममासत्।।४।। त एकदा तु मुनयः प्रातर्हुतहुताग्नयः। सत्कृतं सूमासीनं पप्रच्छुरिदमादरात्।।५।। ऋषयः ऊचुः।। सूत सूत महाबुद्धे सर्वशास्त्रविशारद। वासुदेवस्य माहात्म्यं दत्तदेवस्वरूपिणः।।६।। परमानंदजननं सर्वसंपत्प्रदं नृणाम्। सदानंदस्य नो ब्रूहि योगाख्यानानि सर्वशः।।७।। ऐश्वर्यमतुलं प्रापुस्तद्भक्ता इति शुश्रुम।।८।। सूत उवाच।। शृण्वन्तु मुनयः सर्वे वादवेदाङ्गपारगाः। भवतां परितोषाय दत्तदेवप्रसादतः। माहात्म्यं श्रावयिष्यामि निबोधत यथाश्रुतम्।।९।। कुलाद्रिमृक्षं ब्रह्मवरीयांश्च विधीरितः। पत्नीयुतोऽत्रिः पुत्रार्थं त्र्यधीशोपास्तये ययौ।।१०।। तार्क्ष्यासनस्थोऽब्दशतं संयतात्माऽनिलाशनः। निर्द्वन्द्वः सुतरां दध्यावेकं तादृक्प्रजाप्तये।।११।। प्रापुरत्रिं कविष्णवीशाः स्वस्वचिह्नान्वितास्ततः। तपसा तस्य संतुष्टा वरदानोत्कमानसाः।।१२।। ऊचुस्त ऋषे सत्संकल्प न तेऽसत्। हृद्यं हि एको ध्यातः स इतः कः।।१३।। मादृक्सुतलब्ध्यै वृत्तश्रमसिद्ध्यै। दत्तोऽद्य मयाऽऽत्माऽयं ते सकलात्मा।।१४।। एवं दत्त्वा वरं सद्यो देवा अन्तर्हितास्त्रयः। अथावतरदग्रेऽत्रेर्दत्तात्रेयश्चतुर्भुजः।।१५।। आप्तकामो- ऽपि भगवान् श्रीदत्तो योगमायया। दर्शयन् स्वभक्तवशतां संतोष्य पितरौ स्थितः।।१६।। अथ कश्चिद्द्विजवरस्सर्वसंस्कारसंस्कृतः। अधीतवेदवेदाङ्गश्चरिताश्रमसत्क्रियः।।१७।। चतुःसाधनसंपन्नो दैवीसंपत्समन्वितः। एवं सन्नपि नो शान्तिं प्राप्तो नानाश्रुतभ्रमात्।।१८।। "गुरूक्तार्चाकल्पनया हृत्स्थैर्याद्बोध उद्भवेत्"। इत्यौपनिषदं दत्तं ध्यात्वा संपूज्य यत्नतः।।१९।। तिष्ठन्तं खिन्नहृदयं विषीदन्तं शुचान्वितम्। त्रातुमाविरभूच्छ्रीमान्दत्तात्रेयो दिगम्बरः।।२०।। मनोहरे मार्गशीर्षे शुक्लपक्षे गुरोर्दिने प्रदोषे पूर्णिमायां भे मृगशीर्षाभिधे शुभे।।२१।। प्राह किमर्थं त्वं दुर्मना इव लक्ष्यसे। वद सर्वं ममाग्रे त्वं दौर्मनस्यस्य कारणम् ।।२२।। तं प्रत्युवाच तद्भक्तियन्त्रितो नतकन्धरः।। विमुक्तो मुच्यतेऽनर्थादिति श्रुत्वा तदीहया। प्रवृत्तस्य ममाज्ञस्य भ्रमदोऽभूच्छ्रुतार्णवः ।।२३।। एतेषां कतमः श्रेयान् शिवः पन्थाऽभयोझ्झितः। सुगमो मेऽद्य कृपया संप्रदर्शय सद्गुरो।। श्रीदत्त उवाच। समीचीनः कृतोऽयं हि प्रश्नोऽतोऽवहितः शृणु।। श्रुत्या युक्त्यानुभूत्या च यत्सत्यं तद्ब्रवीमि ते ।।२५।। ईश्वराराधानधिया स्वधर्माचरणात्सताम्। ईशप्रसादस्तद्रूप- स्सुलभश्चात्र सद्गुरुः ।।२६।। सद्गुरोस्संप्रसादेऽस्य प्रतिबन्धक्षयस्तथा। दुर्भावनातिरस्काराद्विज्ञानं मुक्तिदं क्षणात्।।२७।। सत्यव्रतं सत्यपरं त्रिसतद्यं सत्यस्य योनिं निहितं च सत्ये। सत्यस्य सत्यमुत सत्यनेत्रं सत्यात्मकं मां खलु विद्धि सत्यम्।।२८।। द्विपैकदेशमालम्ब्य यथान्धा द्विपवेदिनः। अन्योन्यं कलहायन्ते शास्त्रौघोऽयं तथाऽल्पदृक्।।२९।। विज्ञाय तत्त्वं भवता मदुक्तेर्बुद्ध्वा सदैवोपनिषन्मतं सत्।

स्थेयं तदालोचन एव तेन मुक्तिः कृतार्थत्वमिहैव तेऽस्तु।।३०।। इति श्रीहृत्पुण्डरीकाधिष्ठितश्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवानंदसरस्वतीयतिमतिकलिते श्रीसत्यदत्तव्रताख्याने प्रथमोऽध्यायः।।१।। श्रीगुरुदेव दत्त।।

श्रीदत्त।। सूत उवाच।। इति दत्तोदितं ज्ञानं श्रुत्वा संतुष्टमानसः। नमः सत्यदत्तात्रेयेत्युक्त्वा नत्वाऽवदच्च तम्।।१।। द्विज उवाच।। विराडादिस्थावरान्ता ईश्वरा बहवः श्रुताः। एतेषु कतमोऽर्च्योऽत्र मोक्षसिद्धप्रदश्च कः।।२।। श्रीदत्त।। उवाच।। मच्चिदंशयुतास्ते तु फलदाः स्वाधिकारतः। किन्तु मद्भजनात्कामक्रोधाद्यन्तर्मलक्षतिः।।३।। मत्प्रसादात्ततश्चातस्तमोनाशस्ततोऽमृतम्। निर्गुणोपास्तिस्ततः सर्वान्का- मानाप्त्वाऽमृतो भवेत्।।४।। तस्मात्त्यक्त्वाऽखिलान्धर्मान्मामेहि शरणं द्विज। मत्प्रसादाद्विशुद्धोऽतो मोक्ष्यसे शान्तिमृच्छसि।।५।। स्वस्त्यस्तु ते मदुक्तेस्त्वं सारमाधत्स्व शोधितम्। मद्भक्तेष्वपि योगोऽयं प्रकाश्यो यत्नतस्त्वया।।६।। इत्युक्त्वा भगवान्दत्तो लीलया द्राक्तिरोदधे। स द्विजः कृतकृत्योऽभूत्तदुक्त्यर्थविलोकनात्।।७।। सूत उवाच।। आजीवितं त्रयः सेव्या वेदान्तो गुरुरीश्वरः। पूर्वं ज्ञानाप्तये पश्चात्कृतघ्नत्वनिवृत्तये।।८।। महानुशासनं चेत्थं मनस्यानीय स द्विजः। व्रतं श्रीदत्तस्य चकार प्रेमनिर्भरः ।।९।। पौर्णिमास्यां च संक्रान्तौ शुभे काले गुरोर्दिने। समुपोषोक्तकाले वै समाहृतसमर्हणः।।१०।। सप्तावरणसंयुक्तं दत्तात्रेयं मुनीश्वरम्। कल्पोक्तेन विधानेन सत्यदत्तमपूजयत्।।११।। सितां गोधूमचूर्णं च घृतमेतत् त्रिकं समम्। समादाय सपादं च सम्यक् क्षीरे विपाचितम्।।१२।। संस्कृतं चैलाद्राक्षाद्यैस्स संयावं न्यवेदयत्। ब्राह्मणैर्बान्धवैः सार्धं प्रसादं जगृहे ततः।१३।। एवं श्रीस्तदत्तस्य व्रतं कुर्वन् द्विजोत्तमः। सद्भक्त्योपास्तयोगीन्द्रस्त्यक्तसर्वैषणो वशी।।१४।। दत्तोक्तज्ञानमाहात्म्या- त्पुनरावृत्तिदुर्लभम्। जगामान्ते द्विजश्रेष्ठाः सहसा महसां निधिम्।।१५।। इति श्रीहृत्पुण्डरीकाधिष्ठितश्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवानंद- सरस्वतीयतिमतिकलिते श्रीसत्यदत्तव्रताख्याने द्वितीयोऽध्यायः।।२।। श्रीदत्त।।

श्रीदत्त।। ऋषय ऊचुः।। सूत सूत महाबुद्धे वद नो वदतां वर। माहात्म्यं सत्यदत्तस्य यतः शूश्रूषवो वयम्।।१।। सूत उवाच।। कश्चिद्राजा सोमवंश्य आयुर्मान महामतिः। सम्राट् दाता वशी धन्यः सोऽनपत्यत्वदुःखितः।।२।। श्रीदत्तात्रेयमाहात्म्यं श्रुत्वा मुनिसमीरितम्। गुरुं शौनकमानम्य पुत्रार्थी शरणं ययौ।।३।। राजेन्द्र सत्यदत्तस्य व्रतं कुरु यथाविधि। तद्व्रतस्य प्रभावेण सुपुत्रं प्राप्स्यसि ध्रुवम्।।४।। श्रुत्वेत्थं स गुरोर्वाक्यं व्रतं चक्रे समाहितः। प्रसादं जगृहे भक्त्या भार्याबन्धुजनैः सह ।।५।। अथास्य महिषी स्वप्ने महापुरुषलक्षणम्। मुक्ताफलं चार्पयन्तं क्षीरपूर्णेन कम्बुना।।६।। स्वात्मानमभिषिञ्चन्तं दृष्ट्वा पत्ये शशंस तत् ।।७।। प्रातर्नृपोऽपि संशुद्धः स्वप्नं शौनकमब्रवीत्।। शौनक उवाच।। अनसूयागर्भरत्नदत्तात्रेयार्पितं फलम्।।८।। धर्मात्मा वैष्णवः पुत्रः श्रीसोमान्वयभूषणः। भविष्यतीति स्वप्नेन सूचितं नात्र संशयः।।९।। अत्रान्तरे तु हुण्डस्य तनया नन्दनं वनम्। वयस्याभिर्गता तत्र चारणानां

परस्परम्।।१०।। भाषतां वचनादायोः पुत्रो हुण्डासुरान्तकः। भविष्यतीति सा श्रुत्वा गत्वा पित्रे शशंस तत्।।११।। दुरात्मा दानवो दुष्टः श्रुत्वैवं चकितोऽभवत्। नूनं शत्रुर्ममैवैष हन्तव्यो मे प्रयत्नतः।।१२।। इति निश्चित्येन्दुमत्यै स दुःस्वप्नानदर्शयत्। श्रीदत्तरक्षितो गर्भो नैव बभ्रंश भाग्यवान्।।१३।। ततः सुशोभने काले तुङ्गस्थे ग्रहपञ्चके। असूर्यगे महाभागमसूतेन्दुमती सुतम्।।१४।। दृष्ट्वा तं सुभगं बालं ननन्देन्दुमखी सती। आयू राजा च तं श्रुत्वा पुत्रोद्भवमहोत्सवम्।।१५।। जातकर्माऽकरोत्प्रेम्णा ददौ दानानि भूरिशः। काचिदत्रान्तरेऽरिष्टाद्धात्र्येका बहिरागता।।१६।। हुण्डासुरोऽपि मायावी तस्या अङ्गं प्रविश्य सः। नेतुकामो जजापेष्टां लघुप्रस्वापिनीं विधेः।।१७।। तत्र सुप्तेषु सर्वेषु देव्या संमोहितेष्वथ। प्रादुर्भूय स्वरूपेण दैत्यो बालं जहार सः।।१८।। अपहृत्याथ तं बालं काञ्चनाख्यं पुरं स्वकम्। गत्वा प्रियां समाहूय तस्यै दत्वाऽसुरोऽब्रवीत्।।१९।। प्रिये समक्षमेव त्वं घातयित्वार्भमप्यमुम्। तन्मांसं प्रातराशाय सांस्रं मे देहि पाचितम्।।२०।। तथेत्युक्त्वाऽसुरस्त्री सा बालमादाय निर्दयम्। प्राहैकलाख्यां सैरन्ध्रीं हत्वैनमविचारतः।।२१।। पक्त्वोत्तमं प्रदेहि त्वं प्रियभोजनहेतवे। इत्युक्त्वादाच्छिशुं साऽपि सूदहस्ते तथा ददौ।।२२।। विश्वासेनैव हुण्डस्य प्रिया दत्वाऽर्भकं स्वयम्। जाता कार्यन्तरासक्ता सैरन्ध्र्येकाऽत्र संस्थिता।।२३।। दिव्यं सद्योजातमपि दृष्ट्वा बालं स निर्दयः। चिच्छेद सुशितास्त्रेण तथापि स न विव्यथे।।२४।। श्रीदत्तचक्रगुप्तत्वाच्छस्त्रं भग्नं स नो हतः। भाविबालसुदैवेन शान्ता क्रूरापि सैकला।।२५।। सूदं प्राह त्वया बालो न वध्योऽयं महामते। तथेत्युक्त्वा कृपाविष्टा(ष्टो?) तदैवादाय तं द्रुतम्।।२६।। द्वाराद्बहिर्निधायर्षेर्वसिष्ठस्यागतो पुनः। मृगशावं निहत्यैकं पक्त्वा सूदः सुसंस्कृतम्।।२७।। तन्मांसं दैत्यराजाय धूर्तो विश्वासयन् ददौ। तदाऽसुरो हृष्टतरो भूत्वा मूढस्तदामिषम्।।२८।। भुक्त्वाऽऽत्मानं कुधीर्मेने कृतकृत्यं हतान्तकम्। ततः प्रभाते विमले वसिष्ठो ज्ञानिनां वरः।।२९।। बहिरेत्यार्भकं द्वारि ददर्श मुनिवृंदयुक्। दृष्ट्वा विस्मयापन्न उवाचारुन्धतीपतिः।।३०।। मुनयः पश्यतात्रैष बालः कस्यास्ति सुन्दरः। रात्रौ केन समानीय स्थापितस्तत्र विद्महे।।३१।। मुनयस्तं शिशुं दृष्ट्वा विस्मिता अपि तेऽभवन्। वसिष्ठस्तु तदा ध्यात्वा योगी प्राह त्रिकालवित्।।३२।। आयोस्तु सोमवंश्यस्य दत्तसेवाफलोद्भवः। श्रीदत्तगुप्तः पुत्रोऽयमायुष्मान्राजलक्षणः।।३३।। हुण्डेन स्वान्तकं मत्वा हृतो दैवादिहागतः। मैत्रावरुणिरित्युक्त्वा ज्ञानीशोऽपि विमोहितः।।३४।। कराभ्यां दययाऽदाय स्वाश्रमं तमनीनयत्। वसिष्ठ आह श्रीदत्तप्रसादादमरान्नरान्।।३५।। शीघ्रं विपद उद्धृत्य सम्राड् जिष्णुर्भविष्यति। इति ब्रुवति मौनीशे पुष्पाणि ववृषुः सुराः।।३६।। ननृतुश्चाप्सरोवर्गा गन्धर्वाः सुस्वरं जगुः। ऋषयोऽपि तदा हृष्टाः कुमरायाशिषो ददुः।।३७।। दीर्घायुरस्तु सततं सहओजोबलान्वितः। नामकर्माऽथ विधिवद्वसिष्ठस्तस्य चाकरोत्।।३८।। न क्वापि बालभावैस्ते दूषितं यन्नराधिप। तस्मान्नहुषनाम्ने ते स्वस्त्यस्त्वमरपूजित।।३९।। अरुन्धती सती सापि बालमौरसवत्सदा। ररक्ष दैवनाथं तं वात्सल्याल्लालनादिना।।४०।। प्राप्तेऽथैकादशे वर्षे यथाविध्युपनीय तम्। वेदमग्राहयत्साङ्गं शास्त्राणि च यथार्थतः।।४१।। सरहस्यं धनुर्वेदं सविधानं विशेषतः। ज्ञानशास्त्रं राजनीतिं सेतिहासपुराणकम्।।४२।। बहुशोऽपि विनीतात्मा शिष्यत्वेन यथाविधि।

सिषेवे श्रीगुरुं भक्त्या मनोवाक्कायकर्मभिः।।४३।। इत्थं सर्वगुणापूर्णो नहुषो गतमत्सरः। श्रीवसिष्ठप्रसादेन सर्वा विद्यास्ततार सः।।४४।। इति श्रीहृत्पुण्डरीकाधिष्ठितश्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवानंदसरस्वतीयतिमतिकलिते श्रीसत्यदत्तव्रताख्याने तृतीयोऽध्यायः।।३।। श्रीदत्त।।

।। सूत उवाच।। प्राक्कृतात्पाह्यघादित्थं सकृद्ये प्रार्थयन्त्यपि। तान्पात्यतो नित्ययुक्तभक्तोपेक्षा कथं हरेः।।१।। नीते हुण्डासुरेणार्भे प्रातःकाल उपागते। प्रस्वापिन्यां गतायां च जनः सुप्तोत्थितोऽभवत् ।।२।। वीतनिद्रेन्दुमत्यर्भमपश्यन्ती समन्ततः। विललाप तदा तन्वी सा हाहाकारपूर्वकम्।।३।। केन मे सर्वलक्ष्माढ्यः सुतो देवसुतोपमः। दत्तो दत्तेन गुप्तश्च कथं कस्माद्धृतस्त्वितः।।४।। हा पुत्र हा वत्स हा बाल हा गुणाकर सुन्दर। क्वासीति विलपन्ती सा मूर्च्छिताभून्मृतोपमा।।५।। राजाप्यप्रियमाकर्ण्य प्राप्यारिष्टं ददर्श ताम्। भूत्वातिविह्वलो दीनो विलपन्निदमब्रवीत्।। दत्तात्रेयप्रसादस्य श्रुतं मे फलमक्षयम्। लब्धोऽपि सुगुणः पुत्रस्तत्र विघ्नः कथं त्वयम्।।७।। इह धर्मफलम् नास्ति नास्ति वै तपसः फलम्। नास्ति दानफलं नष्टे सुपुत्रे निश्चिनोम्यदः। दीनवत्सल मां पाहि श्रीदत्तानन्यमातुरम्।।८।। अथ दत्तेरितः प्राप नारदो दिव्यदर्शनः। प्रत्युद्गम्याभ्यर्च्य नृपस्तस्मै दुःखं न्यवेदयत्।।९।। नारद उवाच।। किं नश्वरेण पुत्रेण गृहेणाङ्गेन वै तव। लोकः सुखोऽस्ति ह्यात्मा दत्तोऽमुं शरणं व्रज।।१०।। यं तु शोचसि हुण्डेन हन्तुं नीतोऽपि दैवतः। कस्यचिन्मुनिवर्यस्य गृहेऽस्ति स सुरक्षितः।।११।। विद्वान् हत्वाऽसुरं सार्द्धं पत्न्या गत्वाऽऽशु शत्रुहा। भुक्त्वेह राज्यमैन्द्रं च पदं मर्त्योऽपि भोक्ष्यसि(ति?)।।१२।। इत्युक्त्वाऽथ मुनौ याते भार्यायै तच्छशंस सः। देवर्ष्युक्तिः प्रिये सत्या वरः सत्योऽपि चेशितुः।।१३।। प्रसादो नान्यथा तस्माच्छोकं जह्यङ्गशोषणम्। एवं मुनिप्रत्ययात्तौ स्मृत्वा माहात्म्यमीशितुः ।।१४।। श्रीसत्यदत्तमभ्यर्च्य सुखमासतुरन्वहम्। तद्व्रतस्य प्रभावेण प्रेरितो मुनिपुङ्गवः। वसिष्ठोऽप्येकदाहूय नहुषं तत्र तं जगौ।।१५।। आयोः सुतस्त्वं नहुष इन्दुमत्यात्मजो विधेः। चारणानां भाषणतस्त्वत्तो मृत्युर्भयार्दितः।।१६।। हन्तुं कृतमतिर्दुष्टो हुण्डोऽरिष्टादपाहरत्। सूदायाच्च हन्तुं त्वां स तु दैवादिहानयत्।।१७।। पालितोऽसि मया वत्स सोमवंशविभूषण। क्षत्रोऽसि त्वमतो हिंस्रान्निहन्तुं मृगयां चर।।१८।। तत्रायुष्मन् महाबाहो धनुर्विद्याविशारद। दत्तात्रेयाभिगुर्तस्त्वं गत्वा हुण्डासुरं जहि।।१९।। ब्राह्मणाः पितरो देवा दुरितात्पान्तु रोदसी। पूषा च मा प्रभवतु दुःशंसः सर्वथा जय।।२०।। इति प्रस्थापयामास लब्धाशीः सोऽपि तं गुरुम्। भक्त्या प्रणम्य श्रीदत्तं संस्मृत्य नहुषोऽब्रवीत्।।२१।। यो निषेकप्रभृत्यद्ययावत्स्नेहाद्ररक्ष माम्। स चात्रिनन्दनो युद्धे जयं दत्वाऽवतु प्रभुः।।२२।। एवमुक्त्वा प्रतस्थेऽसौ हन्तुं हुण्डासुरं तदा। पुष्पाणि ववृषुर्देवा आशीर्वादान्मुनीश्वराः।।२३।। अत्रान्तरे सहायार्थं शक्राज्ञप्तस्तु मातलिः। नहुषं प्राप्य देवेन्द्रप्रेरितोस्मीत्युवाच च।।२४।। रथमास्थाय हर्यश्वं दिव्यं हुण्डासुरं जहि। तच्छ्रुत्वा नहुषो हृष्टो भूत्वा नत्वारुरोह तम् ।।२५।। वायूक्तमन्त्रैः सन्नद्धो ययौ हन्तुं महासुरम्। तत्राथ सहायार्थं वापुर्दैत्यारिसैनिकाः।।२६।। सिद्धगुह्यगन्धर्वयक्षविद्याधरोरगैः। कृतं कलकलाशब्दं श्रुत्वा भीतोऽसुरोऽब्रवीत्।।२७।। दूत

गच्छ कुतः शब्दस्तज्ज्ञात्वैहि पुनर्द्रुतम्। गत्वा दूतोऽपि यत्नेन ज्ञात्वैत्याहायुनन्दनः।।२८।। शूर इन्द्ररथारूढो नहुषोऽजेय आगतः। इत्याकर्ण्यासुरः क्रुद्धो भार्यां दासीं च बल्लवम्।।२९।। हतो न वाऽर्भो ब्रूतेति पप्रच्छ स पुनः पुनः। ते हतो भवता लीढः सत्यमित्यूचुरासुरः ।।३०।। दैवं हि बलवान्मत्वा दैत्यान् प्राहोग्रशासनः। सर्वैर्योद्धुं हि गन्तव्यं भीरून्हन्मि क्षणादिह।।३१।। इत्यादिश्यासुरान्योद्धुं सन्नद्धोऽगात्स तैः सह। क्रुद्धो हुण्डः समभ्येत्य नहुषं प्राह भीमवाक्।।३२।। मा गर्ज गर्ज मर्त्योत्थ हुण्डोऽस्मीह प्रतापवान्। जीवन्नैष्यसि पश्चात्त्वं सह देवैर्ममाग्रतः ।।३३।। राजाह सोमवंश्यस्य चरितं क्वापि नेदृशम्। शूरोऽसि यदि युध्यस्व वावदूकतयाऽत्र किम्।।३४।। मां हन्तुमुद्यतस्यापि तव प्राणहरोऽस्म्यहम्। दत्तात्रेयाभिगुप्तोऽस्मि को मूढो मां प्रधर्षयेत्।।३५।। इत्युक्त्वा निष्ठुरं चापमुद्यम्याकर्णमाशुगान्। सन्धाय च ससैन्यौ तौ युयुधाते परस्परम्।।३६।। म दिवा न निशा यत्र भ्राजते तुमुले तराम्। हस्तिनो वाजिनो विद्धा मृता भग्ना रथा अपि।।३७।। असुराणां ववू रक्तस्रवन्त्यो मांसकर्दमाः। गुरुं प्रणम्य नहुषः स्मृत्वा चैवात्रिनन्दनम् ।।३८।। ऐन्द्रीं शक्तिं मुमोचास्मै तया भिन्नो ममार सः। अथैत्य जयिनं सार्द्धं रंभयाऽसुन्दरी।।३९।। प्राहास्मि धर्मपत्नी ते नहुषोपयमस्व माम्। प्राहाग्रे वरिष्यामि गुरोर्मे यदि रोचते।।४०।। तथेत्युक्त्वा रथे तस्यसा रंभा चास्थिता मुदा। नहुषोभ्येत्य गुरवे नत्वा सर्वं न्यवेदयत्।।४१।। हृष्टो वसिष्ठो उद्वाहं सुलग्नेऽकारयत्तयोः। द्रष्टुं प्रस्थापयामास पितरौ नहुषं मुनिः।।४२।। नत्वा गुरुं रथारूढः प्रभयार्क इव स्त्रिया। पितरावेत्य तच्छोकं जहार परिसान्त्वयन्।।४३।। सरथं मातलिं रंभां स्वर्गाय प्रेरयन्नतः। प्रभोर्वरं गुरोर्वाक्यं श्रुत्वायुश्चेन्दुमत्यपि।।४४।। रतिस्मरोपमौ दृष्ट्वा स्नुषापुत्रौ ननन्दतुः। पित्राभिषिक्तो विधिवत् पित्र्यं राज्यं शशास सः ।।४५।। सम्राट् चैन्द्रं पदं भेजे चिरं तेनैव वर्ष्मणा। वानप्रस्थविधानेन महिष्यायुः समं वनम्।।४६।। उषित्वाऽत्रिसुतं ध्यायन् लेभे सायुज्यमक्षयम्।। श्रीसत्यदत्तमर्थार्थी भजन्नेवं क्रमान्नृपः। मुक्त एवं तन्महिमा कोऽपि भक्तो न नश्यति।।४७।। इति श्रीहृत्पुण्डरीकाधिष्ठितश्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवानंदसरस्वती- यतिमतिकलिते श्रीसत्यदत्तव्रताख्याने चतुर्थोऽध्यायः।।४।। श्रीदत्त।।

।। श्रीदत्त।। सूत उवाच।। नतावनात्तसुभगव्रतोऽयं परमेश्वरः। तत्प्रभावं मुनिश्रेष्ठाः पुनः शृणुत सादरम्।।१।। गोदावासी द्विजः कश्चिद्धरिशर्मा तदात्मजः। द्विदशाब्दो यस्य जन्या गुल्मोष्टाब्दः क्षयोऽभवत्।।२।। त्र्यब्दो जलोदरो जीर्णज्वर एकाब्द आयनः। अतिसारः सकासश्च चातुर्मास्यो भगन्दरः।।३।। त्रिदोषेणापि संक्रान्तं प्रेक्ष्य मृत्युन्मुखं पतिम्। तद्भार्या षोडशाब्दाऽगाच्छरणं विष्णुदत्तमित्।।४।। सौभाग्यं देहि मे ब्रह्मन् भर्ता मे रोगपीडितः। अत्युत्कटाः प्रतीकारा दैवाज्जाता निरर्थकाः।।५।। इत्यर्थितो दयालुः स साध्व्या तद्गृहमेत्य तम्। दृष्ट्वा कर्मविपाकं च पत्न्या व्रतमकारयत्।।६।। क्रमेणाशु लयं प्राप तत्तद्रोगः प्रतिव्रतम्। द्विजोऽथ तं हृदि स्पृष्ट्वा जजापोनिषन्मनुम्।।७।। नीरुग्लेभे द्विजस्तेन भूतिमायुः प्रजा यशः। दिव्यां गतिं दत्तभक्तिमिहामुत्र च सद्गतिम्।।८।। एवं श्रीसत्यदत्तस्य व्रतं पापप्रणाशनम्। तुष्टिदं पुष्टिदं नृणां भुक्तिमुक्तिप्रदायकम्।। श्रीदत्तानुग्रहेणैव कथितं च समासतः।।९।। वेदधर्मा

उवाच।। एवं सूतमुखाच्छ्रुत्वा नैमिषेया महर्षयः। श्रद्धया सत्यदत्तस्य व्रतं चक्रुः सुसंहताः।।१०।। सत्रधर्मेण ते वत्स कांक्षन्तो दर्शनं विभोः। दध्युरेकाग्रमनसो दत्तदेवपदाम्बुजम्।।११।। अथ वायुः सुखस्पर्शः पुण्यगन्धवहो ववौ। तमनु ज्योतिषां राशिराविर्भूतः स्वमायया।।१२।। तेजोमण्डलमध्यस्थमुद्यन्तमिव भास्करम्। श्रीसत्यदत्तं द्रष्टुं तमशक्ताश्चर्मचक्षुषा।।१३।। निमील्याक्षीणि ते विप्राश्चिन्तयन्तो हरिं हृदि। प्रार्थयामासुरव्यग्राः कथं नो दर्शनं भवेत्।।१४।।इति चिन्तयतां तेषां वागासीन्मेघनिःस्वना। उन्मीलयत नेत्राणीत्यनन्तेनेरिता द्विजाः।।१५।। ततो ददृशिरे सर्वे शुद्धचित्ताश्च तुष्टुवुः। ऋषयः ऊचुः।। नूनं भवानृषिर्नैव न वर्णाश्रमलिङ्गभाक्। निर्मितं भवतैवेदं विश्वं स्वांशांशतोऽखिलम्।।१६।। न जानन्ति भवन्मायामोहिता दिव्यमुत्तमम्। भवद्धामात एवैते श्र(भ्र?)मन्त्यसुरभावगाः।।१७।। कर्ता भर्तासि हर्ता त्वं प्रत्यक्षं तत्त्वमस्यपि। भो सर्वं खल्विदं ब्रह्म त्वमस्यात्मासि केवलम्।।१८।। त्वदुदेति रमत्येतद्विश्वं त्वय्येव लीयते। अष्टमूर्तिभराभिस्त्वमाभासीव जगन्मयः।।१९।। निगूढतत्त्व ते ज्ञातं यत्किञ्चिल्लोकदुर्ग्रहम्। चेष्टितं, ते प्रसादोऽयं प्राक्पुण्यैरनुभूयते।।२०।। वेदधर्मा उवाच।। एवं स्तुतस्तदा तुष्टो विश्वं स्वस्मिन्नदर्शयत्। उवाच च मुनीन्देवो मेघगम्भीरया गिरा।।२१।। जानीतमागतं विप्राः प्रसादाय भवत्स्विह। तपसा ब्रह्मचर्येण यमेन नियमेन च।।२२।। यज्ञादिना च बहुभिर्जन्मभिस्तोषितो ह्यहम्। सत्यदत्तव्रतेनातो वरं वृणुत माचिरम्।।२३।। ऋषय ऊचुः।। ज्ञापयास्मान्महादेव स्वभक्तान् कुरु निर्वृतान्। येन त्वमस्यात्मसाक्षी किं ब्रूमोऽनुग्रहं कुरु।।२४।। श्रीसत्यदत्त उवाच।। यद्यूयं श्रद्धया स्तोत्रं कृतवन्तश्च मे प्रियम्। योगसिद्धिकरं नृणां भुक्तिमुक्तिप्रदायकम्।।२५।। देहान्ते मत्परानन्दस्वरूपं परमं पदम्। मनोवाचामविषयं यास्यथात्रैव सुव्रताः।।२६।। सन्निपाताक्षिरुङ्मेहकुष्ठश्लेष्मक्षयज्वरान्। वातपैत्तिक- गुल्माद्यान् देशाद्युत्थान् हरेदिदम्।।२७।। पुत्रं वन्ध्याऽभयं त्रस्तो निःस्वः स्वं रोग्यनामयम्। मुमुक्षुः सद्गतिं यद्यद्यस्येष्टं स लभेद्व्रतात्।।२८।। वेदधर्मा उवाच।। इत्युक्त्वान्तर्दधे देवः सहसा महसां निधिः। स्वप्नदृष्ट इव स्वार्थो मुनयो विस्मयं ययुः।।२९।। एवंप्रभावं श्रीदत्तं शरणागतवत्सलम्। स्मर्तृगामिनमीशानं संपूज्य परमाप्नुहि।।३०।। इति श्रीहृत्पुण्डरीकाधिष्ठितश्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवानंदसरस्वतीयतिमतिकलिते श्रीसत्यदत्तव्रताख्याने पञ्चमोऽध्यायः।।४।। श्रीदत्तात्रेयार्पणमस्तु।। श्रीदत्त।।